শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ তৃতীযঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ তৃতীযঃ সর্গঃ ॥

## রামাযণকাৱ্যগতানাং ৱিষযাণাং সঙ্ক্ষেপেণোল্লেখঃ

শ্রুৎৱা ৱস্তু সমগ্রং তদ্ধর্মার্থসহিতং হিতম্।
ৱ্যক্তমন্ৱেষতে ভূযো যদ্ ৱৃত্তং তস্য ধীমতঃ॥ **1.3.1** ॥

উপস্পৃশ্যোদকং সম্যঙ্মুনিঃ স্থিৎৱা কৃতাঞ্জলিঃ।
প্রাচীনাগ্রেষু দর্ভেষু ধর্মেণান্ৱেষতে গতিম্॥ **1.3.2** ॥

রামলক্ষ্মণসীতাভী রাজ্ঞা দশরথেন চ।
সভার্যেণ সরাষ্ট্রেণ যৎ প্রাপ্তং তত্র তত্ত্ৱতঃ॥ **1.3.3** ॥

হসিতং ভাষিতং চৈৱ গতির্যাৱচ্চ চেষ্টিতম্।
তৎ সর্ৱং ধর্মৱীর্যেণ যথাৱৎ সম্প্রপশ্যতি॥ **1.3.4** ॥

স্ত্রীতৃতীযেন চ তথা যৎ প্রাপ্তং চরতা ৱনে।
সত্যসন্ধেন রামেণ তৎ সর্ৱং চান্ৱৱৈক্ষত॥ **1.3.5** ॥

ততঃ পশ্যতি ধর্মাত্মা তৎ সর্ৱং যোগমাস্থিতঃ।
পুরা যৎ তত্র নির্ৱৃত্তং পাণাৱামলকং যথা॥ **1.3.6** ॥

তৎ সর্ৱং তত্ত্ৱতো দৃষ্টৱা ধর্মেণ স মহামতিঃ।
অভিরামস্য রামস্য তৎ সর্ৱং কর্তুমুদ্যতঃ॥ **1.3.7** ॥

কামার্থগুণসংযুক্তং ধর্মার্থগুণৱিস্তরম্।
সমুদ্রমিৱ রত্নাঢ্যং সর্ৱশ্রুতিমনোহরম্॥ **1.3.8** ॥

স যথা কথিতং পূর্ৱং নারদেন মহাত্মনা।
রঘুৱংশস্য চরিতং চকার ভগৱান্ মুনিঃ॥ **1.3.9** ॥

জন্ম রামস্য সুমহদ্বীর্যং সর্ৱানুকূলতাম্।
লোকস্য প্রিযতাং ক্ষান্তিং সৌম্যতাং সত্যশীলতাম্॥ **1.3.10** ॥

নানা চিত্রাঃ কথাশ্চান্যা ৱিশ্ৱামিত্রসহাযনে।
জানক্যাশ্চ ৱিৱাহং চ ধনুষশ্চ ৱিভেদনম্॥ **1.3.11** ॥

রামরামৱিৱাদং চ গুণান্ দাশরথেস্তথা।
তথাভিষেকং রামস্য কৈকেয্যা দুষ্টভাৱতাম্॥ **1.3.12** ॥

ৱিঘাতং চাভিষেকস্য রামস্য চ ৱিৱাসনম্।
রাজ্ঞঃ শোকং ৱিলাপং চ পরলোকস্য চাশ্রযম্॥ **1.3.13** ॥

প্রকৃতীনাং ৱিষাদং চ প্রকৃতীনাং ৱিসর্জনম্।
নিষাদাধিপসংৱাদ সূতোপাৱর্তনং তথা॥ **1.3.14** ॥

গঙ্গাযাশ্চাপি সন্তারং ভরদ্বাজস্য দর্শনম্।
ভরদ্বাজাভ্যনুজ্ঞানাচ্চিত্রকূটস্য দর্শনম্॥ **1.3.15** ॥

ৱাস্তুকর্ম নিৱেশং চ ভরতাগমনং তথা।
প্রসাদনং চ রামস্য পিতুশ্চ সলিলক্রিযাম্॥ **1.3.16** ॥

পাদুকাগ্র্যাভিষেকং চ নন্দিগ্রামনিৱাসনম্।
দণ্ডকারণ্যগমনং ৱিরাধস্য ৱধং তথা॥ **1.3.17** ॥

দর্শনং শরভঙ্গস্য সুতীক্ষ্ণেন সমাগমম্।
অনসূযাসমাখ্যাং চ অঙ্গরাগস্য চার্পণম্॥ **1.3.18** ॥

দর্শনং চাপ্যগস্ত্যস্য ধনুষো গ্রহণং তথা।
শূর্পণখ্যাশ্চ সংৱাদং ৱিরূপকরণং তথা॥ **1.3.19**॥

ৱধং খরত্রিশিরসোরুত্থানং রাৱণস্য চ।
মারীচস্য ৱধং চৈৱ ৱৈদেহ্যা হরণং তথা॥ **1.3.20**॥

রাঘৱস্য ৱিলাপং চ গৃধ্ররাজনিবর্হণম্।
কবন্ধদর্শনং চৈৱ পম্পাযাশ্চাপি দর্শনম্॥ **1.3.21**॥

শবরীদর্শনং চৈৱ ফলমূলাশনং তথা।
প্রলাপং চৈৱ পম্পাযাং হনূমদ্দর্শনং তথা॥ **1.3.22**॥

ঋষ্যমূকস্য গমনং সুগ্রীৱেণ সমাগমম্।
প্রত্যযোৎপাদনং সখ্যং ৱালিসুগ্রীৱৱিগ্রহম্॥ **1.3.23**॥

ৱালিপ্রমথনং চৈৱ সুগ্রীৱপ্রতিপাদনম্।
তারাৱিলাপং সমযং ৱর্ষরাত্রনিৱাসনম্॥ **1.3.24**॥

কোপং রাঘৱসিংহস্য বলানামুপসঙ্গ্রহম্।
দিশঃ প্রস্থাপনং চৈৱ পৃথিৱ্যাশ্চ নিৱেদনম্॥ **1.3.25**॥

অঙ্গুলীযকদানং চ ঋক্ষস্য বিলদর্শনম্।
প্রাযোপৱেশনং চৈৱ সম্পাতেশ্চাপি দর্শনম্॥ **1.3.26**॥

পর্ৱতারোহণং চৈৱ সাগরস্যাপি লঙ্ঘনম্।
সমুদ্রৱচনাচ্চৈৱ মৈনাকস্য চ দর্শনম্॥ **1.3.27**॥

রাক্ষসীতর্জনং চৈৱ চ্ছাযাগ্রাহস্য দর্শনম্।
সিংহিকাযাশ্চ নিধনং লঙ্কামলযদর্শনম্॥ **1.3.28**॥

রাত্রৌ লঙ্কাপ্রৱেশং চ একস্যাপি ৱিচিন্তনম্।
আপানভূমিগমনমৱরোধস্য দর্শনম্॥ **1.3.29**॥

দর্শনং রাৱণস্যাপি পুষ্পকস্য চ দর্শনম্।
অশোকৱনিকাযানং সীতাযাশ্চাপি দর্শনম্॥ **1.3.30** ॥

অভিজ্ঞানপ্রদানং চ সীতাযাশ্চাপি ভাষণম্।
রাক্ষসীতর্জনং চৈৱ ত্রিজটাস্বপ্নদর্শনম্॥ **1.3.31** ॥

মণিপ্রদানং সীতাযা ৱৃক্ষভঙ্গং তথৈৱ চ।
রাক্ষসীৱিদ্রৱং চৈৱ কিঙ্করাণাং নিবর্হণম্॥ **1.3.32** ॥

গ্রহণং ৱাযুসূনোশ্চ লঙ্কাদাহাভিগর্জনম্।
প্রতিপ্লৱনমেৱাথ মধূনাং হরণং তথা॥ **1.3.33** ॥

রাঘৱাশ্ৱাসনং চৈৱ মণিনির্যাতনং তথা।
সঙ্গমং চ সমুদ্রেণ নলসেতোশ্চ বন্ধনম্॥ **1.3.34** ॥

প্রতারং চ সমুদ্রস্য রাত্রৌ লঙ্কাৱরোধনম্।
ৱিভীষণেন সংসর্গং ৱধোপাযনিৱেদনম্॥ **1.3.35** ॥

কুম্ভকর্ণস্য নিধনং মেঘনাদনিবর্হণম্।
রাৱণস্য ৱিনাশং চ সীতাৱাপ্তিমরেঃ পুরে॥ **1.3.36** ॥

ৱিভীষণাভিষেকং চ পুষ্পকস্য চ দর্শনম্।
অযোধ্যাযাশ্চ গমনং ভরদ্ৱাজসমাগমম্॥ **1.3.37** ॥

প্রেষণং ৱাযুপুত্রস্য ভরতেন সমাগমম্।
রামাভিষেকাভ্যুদযং সর্ৱসৈন্যৱিসর্জনম্।
স্ৱরাষ্ট্ররঞ্জনং চৈৱ ৱৈদেহ্যাশ্চ ৱিসর্জনম্॥ **1.3.38** ॥

অনাগতং চ যৎ কিঞ্চিদ্ রামস্য ৱসুধাতলে।
তচ্চকারোত্তরে কাৱ্যে ৱাল্মীকির্ভগৱানৃষিঃ॥ **1.3.39** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে তৃতীযঃ সর্গঃ ॥